श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ सप्तषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सप्तषष्टितमः सर्गः ॥

## हनुमता श्रीरामं प्रति सीतासन्देशस्य श्रावणम्

एवमुक्तस्तु हनुमान् राघवेण महात्मना।
सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ **5.67.1** ॥

इदमुक्तवती देवी जानकी पुरुषर्षभ।
पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ **5.67.2** ॥

सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता।
वायसः सहसोत्पत्य विददार स्तनान्तरम् ॥ **5.67.3** ॥

पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज।
पुनश्च किल पक्षी स देव्या जनयति व्यथा ॥ **5.67.4** ॥

ततः पुनरुपागम्य विददार भृशं किल।
ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ **5.67.5** ॥

वायसेन च तेनैवं सततं बाध्यमानया।
बोधितः किल देव्या त्वं सुखसुप्तः परन्तप ॥ **5.67.6** ॥

तां च दृष्ट्वा महाबाहो दारितां च स्तनान्तरे।
आशीविष इव क्रुद्धस्ततो वाक्यं त्वमूचिवान् ॥ **5.67.7** ॥

नखाग्रैः केन ते भीरु दारितं वै स्तनान्तरम्।
कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ **5.67.8** ॥

निरीक्षमाणः सहसा वायसं समुदैक्षथाः।
नखैः सरुधिरैस्तीक्ष्णैस्तामेवाभिमुखं स्थितम्॥ **5.67.9**॥

सुतः किल स शक्रस्य वायसः पततां वरः।
धरान्तरगतः शीघ्रं पवनस्य गतौ समः॥ **5.67.10**॥

ततस्तस्मिन् महाबाहो कोपसंवर्तितेक्षणः।
वायसे त्वं व्यधाः क्रूरां मतिं मतिमतां वर॥ **5.67.11**॥

स दर्भसंस्तराद् गृह्य ब्रह्मास्त्रेण न्ययोजयः।
स दीप्त इव कालाग्निर्जज्वालाभिमुखं खगम्॥ **5.67.12**॥

स त्वं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति।
ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह॥ **5.67.13**॥

भीतैश्च सम्परित्यक्तः सुरैः सर्वैश्च वायसः।
त्रीन् लोकान् सम्परिक्रम्य त्रातारं नाधिगच्छति॥ **5.67.14**॥

पुनरप्यागतस्तत्र त्वत्सकाशमरिन्दम।
त्वं तं निपतितं भूमौ शरण्यः शरणागतम्॥ **5.67.15**॥

वधार्हमपि काकुत्स्थ कृपया परिपालयः।
मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव॥ **5.67.16**॥

भवांस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम्।
राम त्वां स नमस्कृत्य राज्ञो दशरथस्य च॥ **5.67.17**॥

विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम्।
एवमस्त्रविदां श्रेष्ठः सत्त्ववाञ्छीलवानपि॥ **5.67.18**॥

किमर्थमस्त्रं रक्षः सु न योजयसि राघव।
न दानवा न गन्धर्वा नासुरा न मरुद्गणाः॥ **5.67.19**॥

तव राम रणे शक्तास्तथा प्रतिसमासितुम्।
तव वीर्यवतः कश्चिन्मयि यद्यस्ति सम्भ्रमः॥ **5.67.20** ॥

क्षिप्रं सुनिशितैर्बाणैर्हन्यतां युधि रावणः।
भ्रातुरादेशमाज्ञाय लक्ष्मणो वा परन्तपः॥ **5.67.21** ॥

स किमर्थं नरवरो न मां रक्षति राघवः।
शक्तौ तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ॥ **5.67.22** ॥

सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः।
ममैव दुष्कृतं किञ्चिन्महदस्ति न संशयः॥ **5.67.23** ॥

समर्थौ सहितौ यन्मां न रक्षेते परन्तपौ।
वैदेह्या वचनं श्रुत्वा करुणं साधुभाषितम्॥ **5.67.24** ॥

पुनरप्यहमार्यां तामिदं वचनमब्रुवम्।
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे॥ **5.67.25** ॥

रामे दुःखाभिभूते च लक्ष्मणः परितप्यते।
कथञ्चिद् भवती दृष्टा न कालः परिशोचितुम्॥ **5.67.26** ॥

अस्मिन् मुहूर्ते दुःखानामन्तं द्रक्ष्यसि भामिनि।
तावुभौ नरशार्दूलौ राजपुत्रौ परन्तपौ॥ **5.67.27** ॥

त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः।
हत्वा च समरे रौद्रं रावणं सहबान्धवम्॥ **5.67.28** ॥

राघवस्त्वां वरारोहे स्वपुरीं नयिता ध्रुवम्।
यत् तु रामो विजानीयादभिज्ञानमनिन्दिते॥ **5.67.29** ॥

प्रीतिसञ्जननं तस्य प्रदातुं तत् त्वमर्हसि।
साभिवीक्ष्य दिशः सर्वा वेण्युद्ग्रथनमुत्तमम्॥ **5.67.30** ॥

मुक्त्वा वस्त्राद् ददौ मह्यं मणिमेतं महाबल।
प्रतिगृह्य मणिं दोर्भ्यां तव हेतो रघुप्रिय॥ **5.67.31** ॥

शिरसा सम्प्रणम्यैनामहमागमने त्वरे।
गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी॥ **5.67.32** ॥

विवर्धमानं च हि मामुवाच जनकात्मजा।
अश्रुपूर्णमुखी दीना बाष्पगद्गदभाषिणी॥ **5.67.33** ॥

ममोत्पतनसम्भ्रान्ता शोकवेगसमाहता।
मामुवाच ततः सीता सभाग्योऽसि महाकपे॥ **5.67.34** ॥

यद् द्रक्ष्यसि महाबाहुं रामं कमललोचनम्।
लक्ष्मणं च महाबाहुं देवरं मे यशस्विनम्॥ **5.67.35** ॥

सीतयाप्येवमुक्तोऽहमब्रुवं मैथिलीं तथा।
पृष्ठमारोह मे देवि क्षिप्रं जनकनन्दिनि॥ **5.67.36** ॥

यावत्ते दर्शयाम्यद्य ससुग्रीवं सलक्ष्मणम्।
राघवं च महाभागे भर्तारमसितेक्षणे॥ **5.67.37** ॥

साब्रवीन्मां ततो देवी नैष धर्मो महाकपे।
यत्ते पृष्ठं सिषेवेऽहं स्ववशा हरिपुङ्गव॥ **5.67.38** ॥

पुरा च यदहं वीर स्पृष्टा गात्रेषु रक्षसा।
तत्राहं किं करिष्यामि कालेनोपनिपीडिता॥ **5.67.39** ॥

गच्छ त्वं कपिशार्दूल यत्र तौ नृपतेः सुतौ।
इत्येवं सा समाभाष्य भूयः सन्देष्टुमास्थिता॥ **5.67.40** ॥

हनूमन् सिंहसङ्काशौ तावुभौ रामलक्ष्मणौ।
सुग्रीवं च सहामात्यं सर्वान् ब्रूया अनामयम्॥ **5.67.41** ॥

यथा च स महाबाहुर्मां तारयति राघवः।
अस्माद् दुःखाम्बुसंरोधात् तत् त्वमाख्यातुमर्हसि ॥ **5.67.42** ॥

इदं च तीव्रं मम शोकवेगं
रक्षोभिरेभिः परिभर्त्सनं च।
ब्रूयास्तु रामस्य गतः समीपं
शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ **5.67.43** ॥

एतत् तवार्या नृप संयता सा
सीता वचः प्राह विषादपूर्वम्।
एतच्च बुद्ध्वा गदितं यथा त्वं
श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ **5.67.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥